M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 269

Title: Ashvalyan Shrauta Vidi

Patra

269

Incomplete श्रौत वृत्तिः

आश्वलायन श्रौतसूत्रवृत्ति

		Shrauta-Vritti.	: **Title**
:	:	Narayana Gargya	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
269 :	:	Ends abruptly	: Remarks

श्रीगणेशायनमः॥ श्रीरामोजयति॥ प्रज्ञानानंदमूर्तिः सकलदिगतिगः सर्वदासन्ननन्यः
सर्वस्मात्स्वप्रकाश [illegible] स्वरनिलयः प्रत्यगभासदेहः। श्रौतस्मार्तक्रियात्माश्रुतिमननिदिध्या
सवेद्यस्तथान्यः स ब्रह्म [illegible] वेहरीशः सकलमपि जगत्सर्वदाव्यादसौनः॥ ग्राह्योपरागनिर्मुक्तस्वप्र
काशमनाकुलं। गंभीरबोधमानंदं नमामि ब्रह्मशाश्वतं॥ आश्वलायनसूत्रस्य भाष्यं भगवताकृतं। देव
स्वामी [illegible] व्यक्तिस्तीर्णसिद्नाकुलं। तत्प्रसादान्मयेदानीं क्रियतेवृत्तिरीदृशी। नाराय[illegible]णेनगार्ग्ये
णन [illegible] हस्यसूनुना॥ अथैतस्यसमाम्नायस्यविताने योगापत्तिंवक्ष्यामः। लोकेयानिप्रत्याम्ना
यं [illegible] शास्त्राणिस्मर्यतेतान्यनुष्ठानौपयिकतया ध्ययनविध्याक्षिप्तत्वात्प्रत्याम्नायमंगलंप्रति
[illegible] तत्रांगांगिनोरनुष्ठानक्रमानंतर्यमथशब्दोद्योतयति। एतस्येतिशब्दोनिर्विशेषपुरोवर्ति
नापवालाखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्यशाकलस्यबाष्कलस्यचाम्नायद्वयस्यएतदी १
श्वलायनसूत्रंनामप्रयोगशास्त्रमित्यध्येतप्रसिद्धं संबंधविशेषंद्योतयति। समाम्नायस्येत्युच्यते।
एतस्यैवसम्यगभ्यासयुक्तस्येदंशास्त्रंनशिक्षि [illegible] केनांसम्यगभ्यासरहितानामिति। वितताअग्न
यो [illegible] स्मिन्निति श्रौतंकर्मजातमग्निहोत्रादि विताननशब्देनोच्यते। समाम्नायस्यवि[illegible]इतिविशे
षणाच्छ्रौतेष्वेवाखिलरहितलंगात्येषुसखिलत्वमेवेतिज्ञापते। योगापत्तिः प्रयोगापत्तिः प्रयोगप

रिणतिः। प्रयोगस्वरूपमित्यर्थः। तांवक्ष्यामइतिब्रुवन्निदमेवशास्त्रप्रतिपाद्यमितिदर्शयति। तेनछं
दोगप्रत्ययशास्त्रस्यतत्त्वादेस्तोत्रियत्वादिकार्यसंबंधएवात्रगृहीतव्योनतत्त्वादेः स्वरूपमपितत्र
त्यगमेवेति। प्रयोगएवशास्त्रस्यव्यापारोनप्रयोज्यस्वरूपैति। एतदुक्तंभवति। अध्ययनविधितएव श्री
वोक्तलक्षणसमाम्नायमधिगम्यानंतरंश्रौतेकर्मण्येतत्समाम्नायविहितप्रयोगज्ञानायइदमपिशा
स्त्रमधिगंतव्यमिति। श्रौतेषुकर्मस्वेतदुक्तसमाम्नायविहितानांप्रयोगापत्तिंवक्ष्यामइत्युक्तेइदानींते
ष्वाहिताग्नेरधिकारइत्याह॥ अग्न्याधेयप्रभृतीन्याहवैतानिकानि॥ अग्न्याधेयप्रभृतिरादिरू
पक्रमोयेषांतान्यग्न्याधेयप्रभृतीनिअग्निहोत्रादीनिकर्माण्याधानंकृत्वैवकर्तव्यानीत्यर्थः। तत्र
हेतुमाहवैतानिकानीतिविताने भवानिवैतानिकानिवितानेसिध्यानीत्यर्थः। विताननशब्दोस्मिन्सू
त्रेभावसाधनोग्नीनांविस्तारवाचीपूर्वस्मिन्नधिकरणसाधनोग्निहोत्रादिकर्मवचनः। किमुक्तंभ
वति। गार्हपत्यादिभिरग्निभिः साध्यानिश्रौतानिकर्माणि अग्नयश्चाधानसाध्यास्तस्मादाधानप्र
भृतित्वंसिद्धंश्रौतानांकर्मणां। बहुवचनंसर्वश्रौतकर्मपरिग्रहार्थं। सर्वाणिश्रौतान्याधाना
दूर्ध्वंएवकर्तव्यानिनकिंचिदपिश्रौतमाधानादर्वागिति अनेनप्रकारेणाधानस्यकर्मार्थत्वनि

श्रौ. वृ.
२ राकरणेनाग्न्यर्थत्वमर्थात्साधितं भवति। तद्यदि हि कर्मार्थः स्यात्प्रतिकर्म क्रियेत तत्र च कस्य
चित्परस्तादपि स्यात् यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्या
ग्न्यर्थत्वेन नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः
क्षामवत्यादयो न भवन्ति अवकीर्णिपश्वर्थमाधानं न कर्तव्यं भवति। आहेत्यनेन सर्वमिदं शा
स्त्रं श्रुतिमूलकमिति दर्शयति तेनास्मिन्शास्त्रे यददृष्टमूलकं तदाम्नायान्तरमूलकमिति साधितं भ
वति। अस्मिंस्तु शास्त्रे अनिबद्धस्य स्वाम्नाये दृश्यमानस्य श्रुतित एव प्रयोगसिद्धिर्भवति
श्रुतेः स्वातन्त्र्यसंकीर्तनादिति। आधानस्य प्रथमानुष्ठेयत्वात्प्रथमं तदेव वक्तव्यमित्यत आ
ह॥ दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तत्रस्य तत्राम्नातत्वात्॥ दर्शपूर्णमासशब्दौ
यथासंख्येन सूर्याचन्द्रमसोरत्यन्तसंनिकृष्टविप्रकृष्टदेशास्थितिलक्षणवचनौ तौ योगा
द्देवकर्मवचनौ। अत्र तु कर्मवचनौ पश्चात्त्ययोज्यकवचनोऽपि दर्शशब्दो ल्यान्तत्वात् एवं २
निपात्यते। तुशब्दो विशेषद्योतकः। तन्त्रमंगं संहतिः विध्यन्तरस्यार्थः। सत्त्वावस्थानादिः सं
[illegible]

स्वाजपान्तः। प्रधानस्य तन्त्रणा तन्त्रमित्युच्यते। तच्च दर्शपूर्णमासयोरेवाम्नातं नान्यास्विष्टि
षु अतस्तत्सापेक्षत्वादन्यासां तावेव पूर्वं व्याख्यातव्यौ स्याताम्। एतदुक्तं भवति। आधानस्य
प्रथमप्रयोज्यत्वात्तस्मिन्नेव प्रथमं व्याख्यातव्ये सति तत्साध्यस्य गार्हपत्यादेः पवमानेष्टि
सापेक्षत्वात्ता अपि तत्रैव वक्तव्याः स्युः। उक्ता अपि विध्यन्तसापेक्षत्वात्तस्य च दर्शपूर्णमासयोरेवाम्नात
त्वाद्व्याख्यानमन्तरेण ज्ञानाभावात्तयोरुक्ते नैव शक्यन्ते अतोऽनेन विशेषेण तावेव पूर्वं व्याख्यास्यामः। नाधान
मितिसूत्रस्यार्थः। इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभते॥ दर्शपूर्णमासयोर्हविष्षासन्नेषु होतामन्त्रि
तः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणाद्गार्हपत्यात्प्रपद्यते पूर्वेणोत्करम
परेण प्रणीताः॥ दर्शपूर्णमासयोरित्यधिकारार्थं। आध्यायपरिसमाप्तेः शेषविशेषासंयुक्तस्योभया ॥र
र्थत्वाय। हविरासादनमारभ्य त्वर्णं वोभयसंहतमेवैष्टिकस्य प्रवेशस्य निमित्तं। होत्रमित्यृग्वेदस्य स
माख्या। तद्वेदविहितानां पदार्थानां कर्ता होतेत्युच्यते। प्राङ्मुखत्वं स्थानाचमनाभ्यां संबध्यते।
मध्यगतस्य विशेषाग्रहणात्। यज्ञोपवीतं तावदाचमनार्थं तथा न विधेयं स्मृतिप्राप्तत्वात्। अन्यार्थं
वन भवति संबन्धाभावात्। एकवाक्यगतत्वात्तत्र कर्तृसिध्यमानस्य प्रयोजनाभावः स्मृतिप्राप्तत्वा

श्रौ. सू.

३

देव। अतस्स्मृतिप्राप्तमिहानूद्यते। स्मार्त्तानां स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरु
द्धानामस्मिंश्शास्त्रे प्राप्तिप्रदर्शनार्थं। इदमाचमनं कर्माङ्गं विधीयते। शौचार्थस्य गृहप्रवेशात्
प्रागेव कृतत्वात्। तदुक्तं मनःप्रसादात्तस्योक्तपातपसा स्नानकर्मणा। आचान्तस्याचात्मनः शु
द्धिं कृत्वा कर्म समारभेदिति। दक्षिणावृन्नाम यो दक्षिणपार्श्वमध्ये कृत्वा वर्त्तते स दक्षिणा
वृत्। विक्रियन्तेऽग्नयो यस्मिन्देशे स विहारः। उत्करो नाम उत्कीर्यन्ते वेदिपांसवो यस्मिन्देशे
स उत्करः। प्रणीता नाम आपो मन्त्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः। उत्करं प्रणीता
श्चान्तरेण यो देशस्तेन विहारं प्रपद्यते। एतदुक्तं भवति। स्नात्वाचम्य यज्ञोपवीती भूत्वा हवि
ष्वासन्नेषु आमन्त्रितश्च सन् होता प्रागुदगाहवनीयाद्यो देशस्तस्मिन्प्राङ्मुखो वस्थाय निः
क्रम्य प्राङ्मुख एव भूत्वा चम्य दक्षिणावृद्भूत्वा पूर्वेणोत्करमपरेण प्रणीता यो देशस्तेन ३
विहारं प्रपद्यत इति। उत्करप्रणीताग्रहणादेव विहारप्रत्यये सिद्धे यद्विहारग्रहणं तत्सर्वः
कर्त्ता सर्वकर्मणि विहारप्रपदनं कुर्वीत दक्षिणावृत्त्वेनेतं यथाप्रपद्येतेत्येवमर्थं॥ इध्ममप
रेण प्रणीते॥ यदनौषधिहविष्कं कर्म तदप्रणीतमिहोच्यते। हविश्रपणार्थत्वात् प्रणीतानां

तस्मिन्निध्ममपरेण प्रपद्यते। प्रणीतास्तत्र न सन्तीति॥ चात्वालं चात्वालवत्सु। चात्वालो नामावटः प
शुसोमादिष्वस्ति येषु उत्तरवेद्यर्थं मृत्खनाच्चात्वालः क्रियते तेषु तमपरेण प्रपद्यते। सर्वत्रोत्करः पश्चि
मावधिः॥ एतन्न्यर्थमित्याचक्षते। एतमधानं तीर्थमित्याचक्षते वेदविदः आचक्षत इति श्रुत्वा वैदिकी
२ यं संज्ञा पारिभाषिकीति दर्शयति। उत्कराद्यभावेऽपि संदेशस्तीर्थसंज्ञक एव देशलक्षणार्थत्वादुत्करा
दीनां ग्रहणस्येति। अतोऽग्निहोत्रादिष्वपि तेनैव यथाप्रपदनं सिद्धं भवति॥ तस्य नित्याः प्राञ्चः शेषाः॥ ष
ट्सूत्राणि सर्वार्थानि। तदर्थं तस्येति विशेषणं कृतं। असत्यस्मिन्होतुः प्रकृतत्वात्तस्यैवेमे विधयस्युः
अस्मिंस्तु सति संनिकृष्टविषयत्वात्सर्वनाम्नस्तीर्थेन विहारप्रपदनादेर्यः कर्त्ता विहितः। तस्यैवे
मे विधयो भवन्तीति तस्येति विशेषणं कृतवानाचार्यः। नित्या इत्यनेन प्राकृष्टतायाः नित्यत्वेन विधा
तव्यं विहितत्वादेकस्वरूपेण नित्यत्वयोरपि सिद्धत्वात् अतस्तस्येषोऽर्थः। तस्य बाह्यानां चेष्टानामुपर
मेऽपि मनोवाक्कायप्रयत्नप्राणादयो नित्या एवेति। प्राञ्च इति शब्दः पूर्वदिग्वाची पुंसि बहुवचनान्
तः चेष्टा इति क्रियावाची स्त्रियां बहुवचनान्तः तत्र प्राञ्च इत्ययं नपुंसः प्राक्त्वेन संबन्धात्कर्त्तुः प्राङ्मुख

श्रौ॰ वृ॰

४ त्वंविधीयते।चेष्टाशब्दगतबहुवचनेनास्यबहुत्वस्यसमानाधिकरण्यादेवचेष्टानांप्राप्तत्वंविधी
यतेतासांअमूर्त्तत्वात्ततःप्राप्त्यासंभवात्तत्साधनेषुप्रागग्रतातासांचप्राच्योवाऽपवर्गइतिएवं
विधिवक्ताद्भवति।एतदुक्तंभवति।योयस्तीर्थेनविहारंप्रपन्नस्तस्यतत्राङ्घ्रिक्रमणानमनोवा
क्रायत्राणादयोनित्याःस्युःकर्तुश्चप्राङ्मुखत्वंचेष्टानांचप्रागपवर्गतातत्साधनानांचप्रागग्रेति।
विषमसूत्रप्रणयनेनव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमित्येषापरिभाषासंग्र
हीताभवति॥अंकधारणाच्च॥अंकमूरूपस्थस्तस्यकरणंदक्षिणोत्तरिणोपस्थेनेतिवक्ष्यमा
णरूपंधारणेत्युच्यतेसाचनित्याभवेदुपवेशनकालादारभ्यकर्मसमाप्तेरविच्छेदेनकार्यत्व परि
र्थः।अंकधारणस्योपवेशनांगत्वेनप्राप्तस्यादृष्टार्थतापरिहारायैवनित्यत्वेप्राप्तेतन्नित्यताव
र्ननपत्नीसंयाजिकेऽग्निरस्यतत्रणमित्येवमादिषूपवेशनेषुमंत्रनिषेधेपिवक्ष्यमाणस्योप
वेशनप्रकारस्यानित्यत्वेनप्रापणार्थमिंत्रविध्यसंबंधेष्वप्यग्निहोत्रादिषुवक्ष्यमाणलक्षण ४
स्यैवोपवेशनस्यप्रापणार्थंच॥यज्ञोपवीतशौचेच॥पूर्वस्ययज्ञोपवीतग्रहणस्यसमा

तीनांप्रापणार्थत्वान्निवीतप्राचीनावीतयोर्मानुषपैतृकयोःकर्मणोःस्मार्तत्वेनप्राप्तौसत्यांनिय
मार्थमिदमुच्यतेयत्रनिवीतप्राचीनावीतेविधीयेतेतत्रैवतेभवतोनमानुषःपैतृकंवाकर्मदृष्ट्वेतित
योर्विध्यभावेयज्ञोपवीतमेवेतिनियम्यते।दिशःस्यांगप्रधानार्थत्वादिक्कादिलक्षणादेशांगत्वा
दस्यचविहारदेशेप्राप्तौसत्यामेवंशौचग्रहणेननियम्यतेक्रत्वर्थमप्यशुचित्वसंपादितयत्ना
द्विहारान्निष्क्रम्यबहिःकर्तव्यंअंतर्विहारेशुचिरेवनित्यंस्यादिति॥विहाराद्व्यावृत्तिश्चान
न्तर्वेलकर्म॥व्यावृत्तिःपृष्ठतःकृतिःनविहारंपृष्ठतःकुर्यान्नत्रचविहारेकर्मकुर्वन्भवेत्प्रयोगम
ध्येपिकर्मकुर्वतामेवायंनियमोनोपरतोकर्मणामित्यर्थः।अतोविहारव्यावृत्तिनिषेधात्पश्चा
दस्योपविश्यपश्चात्त्वचस्यधिष्ण्यस्योपविशति।पश्चादुत्तरवेदेरुपविश्याध्वर्युर्नित्येवमादौ
मध्येरेखायाअपक्रम्यउत्तरतउपविशेत्।चशब्दस्त्रिसूत्रेषुनित्यत्वानुकर्षणार्थःतत्रचे
त्कर्मेतिवचनाद्ब्राह्मणेप्ययंनियमोभवेत्।उत्तरसूत्रांगवेदपदत्र्यंतेनब्राह्मणोदक्षिणांगव्या
पारःसिद्धोभवति॥एकांगवचनेदक्षिणंप्रतीयात्॥एकशब्दःकैवल्यवचनःएकंचेत

५ दंगं वैकांगं सव्यदक्षिणभेदेन द्वित्वयोगि यदंगं हस्तादि तस्य द्वित्वेन विना वचनेन दक्षिणमेवांगं साधनं वि
द्यात् द्वित्वयोगे द्वाभ्यां कुर्यात्। एकवचनबहुवचनेन कर्त्रैकत्वबहुत्वापेक्षे एकत्वादीनामन्यत्रोपयोगात्
केवलांगवचनमेव दक्षिणप्रत्ययस्य निमित्तमित्यर्थः। हस्तेन वा पादेन वेत्युदाहरणं॥ अनादेशे॥ द्वि
त्वयोगिनोंगस्यानादेशे क्रियामात्रविधान इत्यर्थः। तत्रापि दक्षिणं विद्यात् प्रपद्यते अभिक्रम्य अंगुलीरं
गुलिभिरित्युदाहरणात्। वक्षुरादेरनंगत्वान्नेदृशं नियमो नास्ति। अवयवविशेषाश्रया हि शाकपश्च
क्षुरादय उच्यंते नावयवा इति॥ कर्मचोदनायां होतारं॥ कर्त्तरि हि नैकक्रियाविधौ होतारं विद्यात् कर्त्तृत्स
हिते स एव कर्त्ता भवत् येन सहितं तत्कर्म स्यात्। कर्त्तरि हितोपि गुणविधिः सर्वार्थ एव कर्मचोदनायामि
ति विशेषणात्। नेदं होतुः प्रापकं किं तर्हि प्राप्तस्य नियामकं तेनेष्टिपशुसोमेभ्योन्यत्र न होतुरेव कर्त्तृ
त्वनियम इति॥ ददातीति यजमानं॥ स्वत्वव्यावृत्तिपूर्वकं परस्वत्वापादनपर्यंतं ददातिविधौ यजमानं
कर्त्तारं विद्यात्॥ जुहोति जपतीति प्रायश्चित्ते ब्रह्माणं॥ तृतीयाध्यायगोचरे प्रायश्चित्तप्रकरणे जु
होति जपति कर्त्तारं ब्रह्माणं विद्यात् जपशब्देनात्र साहचर्यात् जपादिषट्कं गृह्यते तस्मिन्प्रकरणे ५
मुख्यजपस्याभावात्। एवं च सति कर्मकरणत्वेन होममंत्रस्यापि ग्रहणे सिद्धे यज्जुहोति ग्रहणं त

जपग्रहणेन होममंत्रा न गृह्यंत इत्येवमर्थं तेनापित्र्यायां जपादिलोपेपि होममंत्रा न लुप्यंते॥ सर्वं
पादग्रहणे॥ पादशब्दोत्र मृक्वाची सर्वः मृक्ग्रहणे सर्वं विद्यात् नात्र मध्ययोर्ग्रहणे। प्रवो वाजा
अभिद्यवः इत्युदाहरणं॥ सूक्तं सूक्तादौ हीने पादे॥ अत्र पादशब्दो गायत्र्यादीनां भागवाची सूक्ता
दौ हीने पादे गृह्यमाणे सूक्तं विद्यात्। त्वमग्ने वसूं स्त्वं हि क्षैतवद् इत्याद्युदाहरणानि॥ अधिके तृचं सर्वत्र
॥ अधिके पादे गृह्यमाणे तृचं विद्यात् सर्वत्र सूक्तादावसूक्तादौ चेत्यर्थः अग्न आयाहि वीतये गृणान ई
डेन्यो नमस्यस्तिर इत्याद्युदाहरणानि॥ जपानुमंत्रणाप्यायनोपस्थानान्युपांशु॥ सर्वत्र शब्दोत्रा
पि संबध्यते मध्यगतस्य विशेषाग्रहणात्। प्रयोजनवत्त्वाच्च। अस्मिन् शास्त्रे यानि जपादीनि तान्युपां
शु प्रयोक्तव्यानि॥ मंत्राश्च कर्मकरणाः॥ चशब्देनात्र सर्वत्रेत्युपांश्वेति चानुकृष्यते। मंत्राः कर्मक
रणाश्च सर्वत्रोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणं करणवदशब्दममनः प्रयोग उपांश्वि
ति। जपादीनां षण्णां लक्षणमुच्यते। जपमुच्चारणं विद्यात् कृत्वर्थमपि तद्भवेत्। अर्थतः कार्य
का भक्ष्यश्चेदर्थ एव कृतो भवेत्। मंत्रमुच्चारयन्नेव मंत्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्या
देतदनुमंत्रणं। एतदेवाभिमंत्रस्य लक्षणं वीक्षणाधिकं। अद्भिः संस्पर्शनाधिक्यात्तदेवाप्याय

श्रौ० ह०

६ नंस्मृतं। उपस्थानं तदेवस्यात्प्रणतिस्थानसंयुतं। बाह्यं कार्यं तदेतेषु मंत्रकाले क्रियेततत्। कर्मणः
कृतोपाय मंत्राणामुपस्थानं प्रकाशनं। मंत्रेण कृता मंत्रो तोक्रियते कर्मयेषु तु। इदं कार्यमनेनेतिन क्वचि
करणास्तेस्युर्विहितार्थप्रकाशनं। मंत्रेण कृतामंत्रांतोक्रियतेकर्मयेषुतु। इदं कार्यमनेनेति न क्वचि
दृश्यतेविधिः। लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञिताः। अनुमंत्रणग्रहणे नाभिमंत्रणमपि गृह्य
ते। अनुमंत्रणाप्यायनोपस्थानानां कर्मकरणत्वाविशेषेपि यत्स्यथाग्रहणं न तत्मंत्राः कर्मारि
भप्रतिकर्मकरणधर्मायः सतेषु न भवतीत्येवमर्थं। तेन मंत्रोच्चारणसमकालमेवतेषु क्रिया भ
वति॥ प्रसंगादपवादो बलीयान्॥ सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः। लोकवेदप्र
सिद्धस्यन्यायस्यवचनप्रयोजनं सर्वेपवादाः प्रसंगस्यैवबाधकानामपवादाः सावकाशाले
परस्परं बाधकाइत्येवमर्थं। अतः स्वाद्दक्षिलीयासु आहावोत्तरयोः प्रणवयोर्यमिहत्प्रति
गरोनयोः प्रणवरूपः प्रतिगरो न बाधको भवति॥ प्रपद्याभिह्वतांतरेणपादेनवेदिश्रोण्योत्तरया ६
पार्ष्णी समानिधाय प्रपदेन बर्हिराक्रम्य संहितौ पाणी धारयन्नाकाशवत्संगुली हृदयसंमि
तौ बंकसंमितौ वा द्यावापृथिव्योः संधिमीक्षमाणः। तिष्ठेदिति शेषः॥ तीर्थेन विहारं प्रपद्य

तद्युक्तं तच्चैकेन पदविक्षेपेण बहिर्विहारं तौ विहारप्रपदनं कर्तुमशक्यं दक्षिणांगप्रत्ययश्च
सिद्ध एव। इदानीं प्रपद्येत्युच्यते आ वेदिश्रोण्याः प्रपदनं तस्य सर्वस्य विहितत्वासिध्यर्थं। अ
भिह्वतांतरेणेति तरयोर्वचनं अनेकपदविक्षेपसाध्यत्वादस्य प्रपदनस्य सर्वेषु पदविक्षेपेषु दक्षि
श्रोः णस्याग्रतो हरणसिध्यर्थं वेदेरपराश्रोणिरिति संज्ञा। पूर्वा श्रोण्योरंसइतिपादस्यापरो भागः पार्ष्णिः
पूर्वः प्रपदः) बहिर्वेद्यांस्तीर्णं तृणं। उत्तरयाश्रोण्यादक्षिणस्य पादस्य पार्ष्णी समानिधायतस्यैव
प्रपदेन वेद्यांस्तीर्णं बर्हिराक्रम्य बहिर्वेदिसव्यं निधायात्मनः सव्यदक्षिणौ हस्तौ पृथक्पृथक् विर
लांगुलीकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी परस्परसंहितौ वक्रत्वातौ हृदयसंमितावंकसंमितौ
वा धारयन्द्यावापृथिव्योः संधिमीक्षमाणः नोर्ध्वमधस्तीर्यग्वेक्षमाण ऊर्ध्वः प्राङ्मुखस्तिष्ठेत्॥
एतद्धोतुस्थानं॥ अयं स्थानशब्दो भावसाधनो नाधिकरणसाधन एतच्छब्देन श्रोणिदेशेन ह
स्तपादादियंत्रणेन च विशिष्टं यत्पूर्वसूत्रोक्तं तदत्र स्थानशब्देनोच्यत इति प्रदर्श्यते। यत्र होतु
स्थानं चोद्यते तत्रैतत्स्थानं भवतीत्यर्थः। होतृग्रहणमुत्तरसूत्रस्य सर्वार्थत्वाय॥ आसनं वास

स्वसिरोचिषं हृतं स्तृणीमहे समिध्यमानो अध्वरे समिद्धो अग्न आहुतेति द्वे । अथ शब्दः सन्नामेव सामिधे
निर्त्वं दर्शयति पूर्वं सामिधेनीश्च हर्ण सामिधेन्याद्यंगानां मध्ये भिहिंकारः सामिधेन्यादीनामासंते रसंगमि
तिदर्शयति । तेन वैश्वदेवे शस्त्रादि गध्यानोत्तरकालमभिहिंकारः कर्त्तव्य इति गम्यते ॥ ताएकश्रुतिसंतत
मनुब्रूयात् । याएतास्तु का स्त वस्ताएवमनुब्रूयादित्यर्थः ॥ उदात्तानुदात्तः स्वरितानांपरः संनिकर्षए
कश्रुत्यं ॥ एकश्रुत्य लक्षणमुच्यते । उदात्तानुदात्तः स्वरितानामभिव्यंजकाये प्रयत्ना आयामविस्रंभा
क्षेपास्तेषामन्यतमस्यैकस्यैवान्यतः संनिकर्षेण सजातीयप्रयत्नाव्यवधानेन यदुच्चारणं तदेकश्रु
त्यमित्यर्थः ॥ स्वरादिस्सगंतमोकारं त्रिमात्रं मकारांतं कृत्वोत्तरस्या अर्धर्चेवस्येत् संततं । इदं संततलक्ष
णं स्वराद्यगंतयद्योषि प्रदेशोपलक्षणार्थत्वाद्गतो यः स्वरादिः स्वर एवं वा केवल स्तमोकारं त्रिमा
त्रं कृत्वा तेन प्रणवेनोत्तरास्तर्धं संधाय तस्या अर्द्धर्चे वस्येत् । मकारं त्रिमात्रमिति व्युत्क्रमेणान्वयो ज्ञना । स
मुदायस्य त्रिमात्रता यादृष्टत्वात् अत एवं भवति । ओंकारोर्धतृतीयमात्रः मकारोर्धमात्र इति त्रिमा
त्रत्वं प्रणवस्य । उत्तरवचनमात्रितेनोनात्वनितश्चोभयथाग्रह्यते यस्य प्रणवेनोत्तरासंधानमात्रं विधीय
तेन त्संततमित्युच्यते ॥ एतदवसानं ॥ सामिधेनीष्वन्त्यानामृचामर्धर्चेवसानस्य पूर्वस्वरत्रेणेव

सिद्धत्वादिरवसानविधानमायायास्त विप्रापणार्थं । अन्यत्रत्ववशपादिष्वपीति ॥ उत्तरादानमविप्रमोहे ॥ आ
दानमारंभः विप्रमोहो विश्लेषः पूर्वस्योष्ठ्या सस्याविप्रमोह एवोत्तरमुष्ठ्यासमारंभेतेत्यर्थः । विप्रमोहे पूर्व
मेव सम्यग्ब्रूयादित्यर्थः । अस्मिन्श्लेष इदमेव प्रायश्चित्तं नान्यदिति सूत्रस्य प्रयोजनं ॥ समाप्तो प्रणवेना
वसानं ॥ अर्थप्राप्तस्याविधानं विहितएवायमर्थोनार्थप्राप्त इत्येवमर्थं ॥ चतुर्मात्रो वसाने ॥ यदवसानं विहि
तमेवं नार्थप्राप्तं तस्मिन्नवसाने चतुर्मात्रः प्रणवे न त्रिमात्रः ॥ तस्यांतापत्तिः ॥ तस्य प्रणवस्य योंतो मकारस्त
स्य वर्णांतरापत्तिर्वक्ष्यत इत्यर्थः ॥ स्पर्शेषु स्ववर्ग्यमुत्तमं ॥ स्पर्शेषु परेषु यस्य स्पर्शो मकारात्परः तस्य स्वव
र्ग्यउत्तममापद्यते मकारः समिध्यसोत्तमर्ज्यं यंतेत्यादिनिदर्शनं ॥ अंतस्थास्तु तांतामनुनासिकां ॥ रेफ
स्यानुनासिकत्वासंभवाद्यवला एवात्रांतस्था गृह्यंते । तासु या या परा तः स्वास्तां तामनुनासिकां मकार
आपद्यते तत्र सानुनासिकाः पूर्वोत्तराश्रुद्धा एव ॥ अतः संयोगः । विरथ्या विप्रवोदयोंवाज्रीन्द्रतेष्विति
निदर्शनं ॥ रेफोष्मस्वनुस्वारं ॥ एतेषु मकारोनुस्वारमापद्यते । अनुस्वारो नाम नासिकास्थानोस्पष्टकर
णश्च । अस्य यस्त्वस्य सुकृतो समिध्यमानो अध्वर इत्यादि ॥ त्रिः प्रथमोत्तमे अन्वाहाध्यर्धकारं ॥ अध्य
र्धकारमध्यर्धं कृत्वेत्यर्थः । प्रथमोत्तमे सर्वौ त्रिरध्यर्धकारं ब्रूयात् ॥ अध्यर्धमित्वोवस्येदथ द्वे ॥ प्रथ
मायामेवमध्यर्धकारं भवति पूर्वोमध्यर्धमित्वावसायततो द्वे सर्वोऽब्रूयात् ॥ द्वे इति वचनम ॥ र्धर्चे चतुष्का

श्रौ. सू.
२

भिप्रायंपूर्वस्मिन्नुच्छ्वासेप्रथमायामावृत्तौह्वावर्धर्चौद्वितीयायामेकश्चेतित्रयोर्धर्चाउक्ताउत्तरस्मिंस्त्व
च्छ्वासेद्वितीयतृतीययोरावृत्त्योस्त्रयोर्धर्चाउत्तरस्यास्सवएकोर्धर्चइत्येवंचत्वारोर्धर्चावक्तव्याभवेयुः
अध्यर्धकारविधेःउत्तरयासंधानाविरोधादिति।अथशब्दोस्यसूत्रस्यान्यथार्थत्वंप्रतिभासनिरस
नार्थः।अथशब्दश्चपूर्वसूत्र॥ताः
र्थः॥द्वेप्रथममुत्तमस्यामथाध्यर्धा॥पूर्वेणसंधानाविरोधादुत्तमायामेवंभवति।अथशब्दश्चपूर्वसूत्र॥ताः
पंचदशाभ्यस्ताभिः॥एकादशानामन्वाचामाद्यंतयोस्त्रिरभ्यासेकृतेताअभ्यस्ताभिःसहपंचदशैवभवं
तीत्यर्थः।प्राप्तएवायमर्थः।अस्यवचनस्येदंप्रयोजनंसर्वत्राभ्यस्ताभिःसहविहितसंख्यापूरणंकर्तव्य
मिति॥एतेनशास्त्रयाज्यानिगदानुवचनाभिष्टवनसंस्तवनानि॥शंसत्यादिशब्दचोदितानिशस्त्रादी
निभवंति।एतेनेतिसामिधेन्यनुवचनमुच्यते।शस्त्रादीनिचतत्रतत्रविहितानितेषांधर्मापेक्षास्ति।तत्रैतेन
तानीत्युक्तेएतद्धर्मकाणितानीतिगम्यतेअनेनप्रकारेणतेषांसामिधेनीधर्मातिदेशउक्तोभवति।सर्वधर्मप्रा
प्तोकतिपयधर्मनिषेधार्थमाह॥नत्वन्यत्राध्यर्धकारं॥नजपःप्रागभिहिंकारात्॥नाभिहिंकाराभ्यासा
ववकृष्टप्रकृत्या॥अन्यत्रेत्येतावदनुवर्ततेतस्यसामिधेनीभ्योन्यत्रेत्ययमर्थः।अतःपित्र्यायामभिहिं
कारःसिद्धोभवति।अभ्यासनिवृत्त्यर्थंतत्रैवतायहणंकरिष्यति।तेनाभ्यासोनभवति।प्रकृत्येतिशब्दो
भ्यासेनबहुष्वपिपुरीष्यासोअयमद्वत्सेवमादिषुतयोरभावंदर्शयति॥नावच्छेदादौ॥अवच्छेदानामय २

त्रशस्त्रादिषुमध्येसमाप्त्यावस्येदितिएवमादिभिःशब्दैरवसानंविहितंसमाप्यप्रणवेनेत्येवमादिषुसोव
च्छेदः।तत्रापितौनस्तः॥शस्त्रेष्वेवहोतृकाणामभिहिंकारः॥अस्मिंछास्त्रेमुख्यवर्जितानांद्वादशर्त्विजोहो
तृकाइत्युच्यंते।नसम्भवोत्रपोता।तेनग्रावस्तुतोभिहिंकारनिषेधःसिद्धोभवति॥सामिधेनीनामुत्तमेनप्रण
वेनाग्नेमहाँअसि ब्राह्मणभारतेतिनिगदेवसाय॥२॥यजमानस्यार्षेयान्प्रवृणीतेयावंतस्युः।प्रणवेननिग
दसंधायनिगदेवस्येदित्यर्थः।तत्रावसायार्षेयान्प्रवृणीतेयावंतोयजमानस्यतेभवंति।तेचप्रवराम्नायेव्याख्या
ताः॥परंपरंप्रथमं॥अस्येमआर्षेयाइत्यंतःअयंपरअयमपरइत्येवमादिसूत्रेत्यनुसारेणप्रवराम्नायएव
वरणप्रकारःपाठितःसएवइदानीमियंतोवरितव्याइत्थंवरितव्याइतिविधानमन्यक्षेत्रजातद्व्यामुष्याय
णार्थं॥पौरोहित्यान्राजन्यविशां॥पुरोहितस्यैवआर्षेयास्तानेवराजन्यवैश्ययोःप्रवृणीतेबहुवचनं
त्रैवर्णिकस्त्रीजातानामनुलोमानांसंग्रहार्थं॥राजर्षीन्वाराज्ञां॥मानवैलपौरूरवसेत्येवंसपौरोहि
त्यान्वा॥सर्वेषांमानवेतिसंशये॥अज्ञानेसंशयेचत्रयाणांवर्णानांमानवेत्ययंशब्दःप्रवरोभवेत्॥देवे
द्धोमन्विद्धऋषिष्टुतोविप्रानुमदितःकविशस्तोब्रह्मसंशितोघृताहवनःप्रणीर्यज्ञानांरथीरध्वराणा
मतूर्तोहोतातूर्णिर्हव्यवाळिस्यवसायास्पात्रंजुहूर्देवानांचमसोदेवपानोअराँइवाग्नेनेमिर्देवांस्त्वंपरि

श्रौ॰ द॰

१० भरस्यावहदेवान्यजमानायेतिप्रतिपद्यदेवताद्वितीययाविभक्त्यादेशमादेशमावहेस्यावाहयत्यादिंप्लावयन्।
निगदेवसायेतिनिगद इतिसप्तमीनिर्देशात्सर्वोपरी भरतोनिगदोनपरिसमाप्त इतिगम्यते। अतः प्रवरोपितस्ये
वशेषः। क्वचिन्मंत्राम्नाये भारतशब्दानंतरमसावसावितिप्रवरप्रकृतेः। पठितत्वाच्च संबुद्धिसामानाधिकरण्या
च्च। देवेद्ध इतिनिविदस्य निगदः। चतुर्दशनिविद्। पदानिपरिभरतसीत्येवमंतानि। आवहदेवान्यजमानायेत्यादि
सुयजायजेत्यंत आवाहननिगदः। सामिधेन्यादय एते मंत्रा आहवनीयाभिधायिनः। तत्र भारतेत्यस्यंते। प्रवरा
नेव। निविदस्पदानामेकादशैव। चतुर्दशेनावाहननिगदं संधाय यजमानायेत्यवस्येत्। प्रतिपद्यावसायेत्यध्याहा
रात्। प्रतिपद्येतिवचनमस्य वाक्यस्य प्रतिपत्तिसंज्ञाकरणार्थं। तेन पित्र्यायां प्रतिपत्त्यंतरविधानए तन्न भवति।
तत्रास्थितो देवता वक्ष्यमाणा द्वितीयया विभक्त्यादिश्यादिश्यानंतरमावहेत्यावाहयति। आवहशब्दस्यादिं
प्लावयन्। द्वितीयाविधानं भवति। विभक्त्यंतरविधाने तु तदेव भवति। आवहदेवान्होत्रायावहावहजातवेद
इत्येतेषु त्रिषु प्लुतावसानेन स्तः॥ अग्न आवहेति तु प्रथमदेवतां॥ प्रथमदेवतायामयं विशेषः। तुशब्देन पष्टव्य
देवतावाहनशब्दयोर्मध्ये तु नेशब्दं ब्रूयात्॥ अग्निं सोममित्याज्यभागौ॥ यागयोरियमाख्यातसंबंधाद्देवत १०
योरपीति॥ अग्निमग्नीषोमाविति पौर्णमास्यां॥ विशेषाभावात्सोमयाजिनोऽसोमयाजिनश्च प्रधानदेवतेएते।
अग्नीषोमयोस्थाने इंद्राग्नी अमावास्यायामसंनयतः॥ पौर्णमास्याः प्रथमाम्नानात्सैव प्रथमं प्रयोज्या। स्थान

शब्दः पौर्णमास्या धर्माणां प्रथमसंबंधं दर्शयति। प्राप्तावविशेषेपि प्रयोगावस्थायां विशेषग्रहणादिति।
तेनेदं बोधितं भवति। असमाम्नातानामसति चोदनालिंगविशेषे पौर्णमासमेव तंत्रमिति। दधिपयोभ्यां या
गं कुर्वन्संनयं नित्युच्यते। योनसंनयति तस्येंद्राग्नी द्वितीया॥ इंद्रं महेंद्रं वा संनयतः॥ संनयतो मावास्या
यामिंद्रं महेंद्रं वा अग्नीषोमस्थाने आवाहयेत्॥ अंतरेण हवींषि विष्णुमुपांश्वैतरेयिणः। एतरेयिणः
शाखाविशेषाध्यायिनस्तात एवमुपांशुयागं उभयोरपि पर्वणोरंतरेण हविषी इच्छंति॥ अग्नीषोमीयं पौर्ण
मास्यां वैष्णवममावास्यायामेके॥ नैके कं चन॥ उभयोरपि पर्वणोः कं चनोपांशुयाजमेके नेच्छंति॥ अन्ये
षामप्युपांशुनामावहस्वाहायाट् प्रिया धामानीदं हविर्महोज्याय इत्युच्चैः। अन्येषामपीति पित्र्यादीनामं
गोपांशुत्वसंग्रहार्थं आवाहनादिषु चतुर्षु निगदेषु यान्युपांशुयाजसंबंधीनि षट्पदान्यावाहनादीनि तेषा
मुच्चैरितिसंज्ञामात्रं विधीयते। तंत्रस्वराण्युपांशोरुच्चानीत्यनेन सर्वेषामुच्चैः संज्ञानां तत्र स्वरो विधीयते। य
न्येतद्देवनाः परोक्षप्रियाः पदांतरसंनिधानादेव विशेषनिष्ठतावसीयते न स्वतः। अनुषतादयः क्रियावचना
इत्यर्थः। तेषामुपांशुत्वं प्राप्तमनच्चैः संज्ञाविकल्पेन विधीयते॥ प्रत्यक्षमुपांशु॥ यागं प्रतिचोदितदे
वतानामधेयं प्रत्यक्षमित्युच्यते तस्य प्राप्तमुपांशुत्वं नियमार्थं विधीयते तस्य चोपांशुत्वं भवेत्। उपांशु
देवतायाः प्रथमेपि पिप्रथमदेवतायाः संबंधियोग्निशब्द आवाहनस्विष्टकृन्निगदयोर्न तस्यापीति। अ

×स्तानुपांशुरुच्चैर्वा। ४

श्रौ॰ह॰

११ त्रकिंचिदुच्यते। उपांशुयष्टव्यमितिवचनादुपांशुत्वंयागधर्मतयावगम्यमानंतत्रासंभवादानर्थक्यतदंग
न्यायेनतत्संबंधिनःशब्दान्परिगृह्यातिष्ठतितत्रावहादिनामागुरादीनांचहोतायक्षदित्यस्यचोपांशुत्व
नियमादन्यस्यसर्वस्यतंत्रस्वरेप्राप्तेयाज्यानुवाक्ययोरागुरादिभिःप्राणसंतानविधानादुपांशुत्वमेवस्थि
तं॥ प्रतिचोदनमावाहनं॥ चोदनांचोदनांप्रतिप्रतिचोदनं। चोदनादेवताचोदना। यावत्योदेवताश्चोदितास्ता
वंत्यावाहनानिभिन्नानीत्यर्थः। प्रत्यावाहनमुच्छ्वासनिश्वाससिध्यर्थंभेदसाधनं॥ सर्वाआदिश्यसकृदे
कप्रदानाः॥ यत्रबहुभिर्हविर्भिरेकया याज्यया बह्वीभ्योदेवताभ्योयुगपद्यागःक्रियतेतत्एकप्रदानायागाः
गाः। तत्संबंधादेवताअप्येकप्रदानाइत्युच्यते। सर्वाइतिवचनंसर्वासांपृथगादेशार्थं। आदिश्यवचनंसर्वा
आदिश्यंतेआवहशब्दप्रयोगार्थंसकृद्वचनमंतेपिसकृद्देवचतेयानयावद्देवतमित्येवमर्थं॥ तथोत्तरेषु
निगमेष्वेकामिवसंसक्तयात्। एकामिवेतिवचनंयथैकस्यादेवतायाःपुरस्तात्स्वाहायाद्शब्दोअनुषतादृ
यश्चैकवचनेनतथैतास्वपीति॥ समानांदेवतांसमानार्थां॥ निगमेष्वेकामिवसंसक्तयादित्यत्रापिसंबध्यते ११
विशेषाग्रहणात्। प्रयोजनवत्वात्संप्रदायाच्च। समानामित्येकशब्दामित्यर्थः। समानार्थामित्येकप्रयो
जनामित्यर्थः। अव्यवहितांसकृन्निगमेषु। अव्यवहितां अन्ययादेवतयानिगमेषुसकृद्ब्रूयात्। एकवच
नेनैव॥ ओब्राूस्वावापिकासुदेवांआज्यपांआवहाग्निंहोत्रायावहःस्वंमहिमानमावहावहजातवेदः

सुयजायजेत्यावाह्ययथास्थितमध्वर्धजानुरूपविश्योदग्वेदेर्व्यहृत्यतृणानिभस्मोप्रादेशंकुर्यात्। अदिति
र्मतास्यांतरिक्षान्माछेत्सीरिदमहमग्निनादेवेनदेवतयात्रिवृतास्तोमेनरथंतरेणसाम्नागायत्रेणछंदसा
ग्निष्टोमेनयज्ञेनवषट्कारेणवज्रेणयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीति। आवायिकाआवायोद्धार
योग्याःप्रधानदेवताइत्यर्थः। तासुकृतावाहनासुदेवानाज्यपानावाहयेत्। स्विष्टकृतंच। पाठोनुनासिक
लाभायनकारलोपायच। होत्रायावहशब्दयोःस्विष्टकृदावाहनप्रयोगायच। किंच। पठितावाहनानांपा
ठादेवोत्तरेष्वपिनिगमेषुनिगमनसिद्धिनलक्षणतइत्येवमर्थं। आज्यपाःप्रयाजानुयाजदेवताः। अग्निंहोत्रा
यावहस्वंमहिमानमावहेत्येतावान्स्विष्टकृदावाहनार्थः। आवहजातवेदइत्यादिसुयजायजइत्यंतोनिगदशे
षः। आवाह्यवाचनंसुयजायजांतस्यआवाहननिगदत्वायसामिधेन्यर्थंयथास्थितस्तथोर्ध्वजानुरूपविश्य
उदग्वेदेर्व्यहृत्यवेद्यांस्तीर्णानितृणानिवेद्यांभस्मोप्रादेशंकुर्याददितिर्मातेतिमंत्रेण॥ आश्रावयिष्यंतमनुमंत्र
येताश्रावययज्ञंदेवेषाश्रावयमांमनुष्येषुकीर्त्यैयशसेब्रह्मवर्चसायेति। प्रवरणानं। देवसवितरेतंत्वावृण
तेग्निंहोत्रायसहपित्रावैश्वानरेणद्यावापृथिवीमांपातामग्निर्होताहंमानुषइतिमानुषइत्यध्वर्योःश्रुत्वो
दायुषास्वायुषोरोषधीनांरसेनोत्पर्जन्यस्यधामभिरुदस्थाममृतांआन्वित्युत्तिष्ठेत्। अध्वर्युग्रहणमुत्त
रार्थं। पश्चिमाध्वर्योनवतिश्वपाशाअग्निंहोतारमंतराविसृजाः। सिनंतिपाकमतिधीरएतौत्युच्छ्राय।

ब्रूयादिति शेषः। नायमुत्थानमंत्रः। पूर्वेणैव निरपेक्षत्वात्। अतएव दशोमंत्रो मंत्रसंज्ञकः। स्तनस्य
पंथामन्वेमि होतेत्यभिक्रम्यासे ध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना। अत्राध्वर्युग्रहणे न प्रयोजनम
भिक्रमणान्वारंभणे ध्वर्योरेव कुर्यान्न प्रतिप्रस्थातुरित्येतत्। अत्र बाहोः संधिरंसस्तस्मिन्देशे ध्व
र्युमन्वारभेत पार्श्वस्थेन पाणिना पार्श्वेनेति वक्तीति पार्श्वस्थः कनिष्ठिकाप्रदेशेन स्थितः न... नोत्ता
नइत्यर्थः। तेनान्वारभेताध्वर्युं॥ आग्नीध्रमंकदेशेन सव्येन वा॥ सव्येन पाणिना पार्श्वस्थेनांस एकांवे
नउरुणा वा॥ इंद्रमन्वारभामहे होतृत्वर्ये पुरोहितं। येनायन्नुत्तमं स्वर्देवा अंगिरसो दिवमिति। उभ
योः साधारणमंत्रः अतो नावर्त्तते नो त्सनेच। संमार्गैस्तरेणैस्त्रिरभ्यात्मंमुखं संमृज्जीत। संमार्गोसि संमा
प्रजयापशुभिर्मृद्धीति। इध्मसंनहनानि संमार्गशब्देनोच्यंते। अग्निसंमार्जनसाधनत्वात्तेषां
तैस्तरेणैरभ्यात्मंमुखं संमृज्जीत। तरेणैरिति क्वनात्तरणीभूतैरेवतैः संमृज्जीत नर्थ्यथिभूतैः पाश १२
भूतैर्वेति गम्यते। अभ्यात्ममात्माभिमुखं पाणितत्क्रमवागपवर्गश्च संमार्जनमिति॥ सकृन्मंत्रेण द्वि
स्तूष्णीं सर्वत्रैवं कर्मावृत्तौ॥ सकृन्मंत्रेण द्विस्तूष्णीमित्येतत्सर्वत्र भवत्येवंप्रकारस्य कर्षण आ
वृत्तौ सत्यामिति। एवंप्रकारशब्देन संस्कारकर्मत्वमुच्यते। एतदुक्तं भवति। यत्र संस्कारकर्मणस्थि

रावृत्तिर्विधीयते। तत्र सकृन्मंत्रेण द्विस्तूष्णीमिति। न प्रधानकर्मणः। स्पृष्ट्वोदकं होतृषदनमभिमंत्र
येताहि दैधिषव्योदतस्तिष्ठान्यस्य सदनेसीद योस्मत्पाकतर इति। होतृषदनमपरेण स्थित्वा प्राङ्मुखो
भिमंत्रयेत। इदमुदकोपस्पर्शनं पूर्वांगं। अग्निसंमार्जनतरेणैरात्मनो मुखसंमार्जनात्। आत्मनो यदो
द्यंतद्यांत्यर्थत्वेनास्य दृष्टार्थत्वं भवति। अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निर
स्येन्निरस्तः परावसुरिति इदमहमर्वावसोः सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणोपस्थेन। दक्षि
णं वतदुत्तरं वद दक्षिणोत्तरं। तद्वानुपस्थो दक्षिणोत्तरी तेनोपविशेत्। एतेनिरसनोपवेशने सर्वास
नेषु सर्वेषामहरहः प्रथमोपवेशने पि समाने॥ एते इति प्रकारमंत्रविशिष्टयोर्ग्रहणार्थं। ते च सर्वे
षां सर्वासर्वान्नेषु प्रथमोपवेशने भवतः न द्वितीयादिप्रयोग इत्येकोर्थः। समानेप्यासने अहर्गणेष्व
हरहः प्रथमोपवेशने भवतः अयमपरोर्थः। समाने पि स्थाने प्रयोगावृत्तौ पुनः पुनरावर्त्तेते प्र...र्ग्न्यादिषु
अयं चापरोपि शब्दाल्लभ्यते। अस्य विधेर्द्दर्शपूर्णमासप्रकरणे पठितत्वात्तदतिदिष्टेष्वेवेष्टिपशु
सोमेषु भवति नाग्निहोत्रादिष्विति। अंकधारणं भवत्येव॥ द्विरिति गौतमः॥ अस्याचार्यस्य द्विः द्वितीये
पि प्रयोगे भवतीत्यभिप्रायः॥ ३॥ ब्रह्मौदने प्राशिष्यमाणेग्न्याधेये ब्रह्मा॥ द्विरित्यनुवर्त्तते। क्रियमाण

१३ स्यकर्मणः दक्षिणत उपविष्टः सन् पुनर्ब्रह्मौदनप्राशनकाले द्वितीयेनिरसनोपवेशनप्राप्तिरितिगम्यते
अग्न्याधेयग्रहणमश्वमेधेपियब्रह्मौदनंतत्रनैवंकर्तव्यमिति॥ बहिष्पवमानासर्पणेसर्वसोमे॥ आहवनीयस्यद
क्षिणत उपविष्टः सन् बहिष्पवमानंगत्वा ततः प्रत्येत्यपूर्वासनेपुनः कुर्यात्। सोमग्रहणंसर्वेषुसोमेषुप्राप
णार्थंद्वितरथाधानाधिकारात्तत्संबंध एव सोमेस्यान्नसर्वसोमेष्विति॥ प्रसृप्यहोता॥ पश्वर्थमुपविष्ट ए
वासनेसदः प्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्। होतृग्रहणं ब्रह्माधिकारनिवृत्त्यर्थं। स्रुचोदापनेपश्नौ॥ स्वाहा गा
कृत्यस्वाहाकृत्यर्थस्रुग्दापनेपुनः कुर्यात्। नपत्नीसंयाजादिके॥ पत्नीसंयाजार्थउपवेशनेनैवकुर्यात्।
नान्यत्रहोतुरितिकौत्सः॥ होतुरन्येषामेतेनभवतइतिकौत्सोमन्यते॥ उपविश्ययदेवबर्हिःस्थास्वस्त्वा
ध्यासदेयमिति। उपविश्यानंतरं ब्रूयादित्यर्थः। अभिहिषहोतः प्रतरां बर्हिषद्भवेति। जानुशिरसाबर्हि
रुपस्पृश्यातऊर्ध्वंजपेत्। जानुशिरोजान्वग्रं। अतऊर्ध्वग्रहणमुपस्पृशतोनजपस्यादिति। तेनान्यत्रैवंरूपे
शब्देसतिकुर्वन्नेवकुर्यादितिगम्यते। अरणीसंस्पृश्यमंथयेदित्यादिषु॥ भूपतयेनमोभुवनपतयेन १३
मोभूतानांपतयेनमोभूतयेनमः प्राणंप्रपद्येपानंप्रपद्ये व्यानंप्रपद्ये वाचंप्रपद्ये चक्षुःप्रपद्ये श्रोत्रंप्रपद्ये
मनः प्रपद्य आत्मानंप्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभंप्रपद्ये जगतींप्रपद्येनुष्टुभंप्रपद्ये छंदांसिप्रपद्ये सर्वो

नोदिवस्पातुनमो महद्भ्यो नमो अर्भकेभ्यो विश्वेदेवाः शास्तनमायथेहहोताधिहोतानिषदायज्ञीयांस्त
द्यवाचः प्रथमंमसीयेतिसमाप्यप्रदीप्तइध्मे स्रुचावादापयेन्निगदेन। समाप्यप्रदीप्तेइध्मउभयस्यस्रु
गादापनावसरप्रदर्शनार्थत्वाज्जपसमाप्तिरपिप्रदीप्तएवेतिगम्यते। अनेननिगदेन आदापयेत्स्रुचा
ध्वर्यु॥ अग्निर्होतावेत्वग्नेर्होत्रंवेत्तु प्रावित्रंसाधुतेयजमानदेवताया अग्निमित्यवसायहोतारमदृष्था
इतिजपेत्। अवसायेतिवचनंनिगदमध्येउच्छ्वासलाभार्थं। जपेदितिनिगदमध्येउपांशुत्वलाभाय॥ अथ न
समापयेद्भगवतीमध्वर्योस्रुचमास्यस्वदेवयुवं विश्ववारेईळामहैदेवाँईळेन्यान्नमस्यामनमस्यान्यजामय
ज्ञियानिति। अथेतिवचनमत्राप्युच्छ्वासलाभार्थंसमाप्तिवचनमग्निर्होतेत्यादेर्यज्ञियानित्यंतस्यएकनिग
दत्वख्यापनार्थं॥ समाप्तेस्मिन्निगदेध्वर्युराश्रावयति॥ अध्वर्युकर्मविधानं प्रत्याश्रावणस्येदंनिमित्तमिति
ज्ञापनार्थं। समाप्तिवचनमाश्रावणेद्गतेपिसमाप्तएवनिगदेप्रत्याश्रावणंकुर्यात् इत्येवमर्थं॥ प्रत्याश्रा
वयेदाग्नीध्रउत्करदेशेतिष्ठन्स्फ्यमिध्मसन्नहनानीत्यादायदक्षिणामुखइतिशाट्यायनकेमस्त्कश्रौ
षकिस्योकारंप्लावयन्। शाट्यायनग्रहणंविकल्पार्थं। अतः प्राङ्मुखत्वमपिलभ्यते। प्लावयन्
प्लुतंकुर्वन्नित्यर्थः॥ ४॥ प्रयाजेश्चरंति। वक्ष्यमाणलक्षणायागाः प्रयाजाइत्युच्यंते। तेश्चरंतियजंती
त्यर्थः। पंचैतेभवंति॥ पंचवचनंनराशंसः तनूनपाद्वाद्यामुष्यायणस्यापिपंचैवभवंतिनषळित्येवमर्थं

श्रौ॰सू॰
१४

एतदितिवचनंपठितात्एवैतेतनूनपान्नराशंसयोरन्यतरेण सहपंचभवंति।नापठितेनसहेत्येवमर्थं।
एकैकंप्रेषितोयजति।नसहप्रेषितःसर्वान्यजति॥आघार्याज्यादिरनुयाजवर्ज्यं।सर्वत्रसर्वासामनु
याजादिवर्जितानांयाज्यानामादावागूर्भवति।कोयमागूरित्याह।येयजामहइत्यागूः।वषट्कारोंत्यः
सर्वत्र।अनुयाजानामपीतिसर्वत्रवचनं॥उच्चैस्तरांबलीयान्याज्यायाः।अत्रोच्चैस्तरत्वमेकयमाधि
क्यं।बलीयस्त्वंव्यक्ततरोच्चारणं।एतदुभयंयाज्यायाएव।तयोरादौप्लावयेत्॥तयोरागूर्वषट्कारयो
राद्याप्लुतिःकार्या॥याज्यांतेच॥प्लावयेदितिशेषः॥विविच्यसंध्यक्षराणामकारंनचेद्वैचचनोव्यंजनां
तोवा॥नचेत्प्रगृह्यइतिपठितव्येनचेद्वैचचनइतिप्रमादपाठः।सर्गंतेयानिअप्रगृह्याणिसंध्यक्षराणि
तानिविविच्याकारमेवप्लावयेदितिएकारैकारयोःआइइतिओकारौकारयोःआउ।इत्येवंविविच्य
प्लुतिःकार्या।ज्येष्ठश्रमंत्रोविश्वचर्षणा३इवौषडित्यादिदृष्टांतः।एकारस्यप्रगृह्यस्यस्वरूपेणैवप्लु १४
तिःकार्या।ओकारस्यतुप्रगृह्यसंज्ञायाअनित्यत्वान्नित्यानित्यसंयोगविरोधात्तस्यसर्वदापिविविच्ये
वप्लावनंकर्तव्यं॥व्यंजनांतोवा॥व्यंजनांतानांसंध्यक्षराणांसर्वदास्वरूपेणैवप्लुतिःकार्या।नविवेकः
कर्तव्यः।अधिश्रियंशुक्रपिशंदधाने३वौ३षडित्यादिदृष्टांतः॥विसर्जनीयोनंत्याक्षरोपधोरि
फ्यते।अनंत्याक्षरोपधःअनवर्णोपधइत्यर्थः।सवषट्कारेणसंधीयमानोरिफ्यतेपिबासोममभि

यमित्यादिनिदर्शनं॥इतरश्चरेफी॥इतरअवर्णोपधःसचेद्रेफिसंज्ञीचेत्रिफ्यतेमहोयोवर्जमितरोय
थोक्तमित्यत्ररेफिसंज्ञाधिगंतव्या।उतस्यंवमसंनवमित्यादिनिदर्शनं॥लुप्यतेरेफी॥अवर्णोपधोयो
विसर्जनीयः।रेफिसंज्ञश्चनभवति।सलुप्यतएववषट्कारसंधौ।अर्वाङेहिसोमकाममित्यादिनि
दर्शनं।प्रथमःस्वंतृतीयं॥वर्गाणांयोपःप्रथमःसस्वंतृतीयमापद्यते॥नित्यंमकारे॥अंतस्थासुतोता
मित्यनेनोक्तमित्यर्थः॥ये३यजामहेसमिधःसमिधोअग्नआज्यस्यव्यंतु३वौ३षळितिवषट्कारः।
वौषट्शब्दोवषट्कारइत्यर्थः॥इतिप्रथमः।अयंप्रथमःप्रयाजइत्यर्थः॥वागोजःसहओजोमयिप्रा
णापानौवितिवषट्कारमुक्त्वानुमंत्रयते।सर्वस्यायंविधिरित्यादित्येवमर्थावीप्सा।दिवाकीर्त्यं
वषट्कारः।दृथारावैनप्रवैक्तव्यइत्यर्थः।किंचवषट्कारसंबंधियत्कर्मतद्विध्यंतरान्तिरोधेसति
दिवैवकर्तव्यमिति॥तथानुमंत्रणं॥दिवाकीर्त्यमित्यर्थः।तच्चोक्तार्थमेव।एतद्याज्यानिदर्शनं।य
दिदंयाज्यायाःपुरस्तादागूःतस्याश्चादौयाज्यांतेचप्लुतिः।उपरिष्टाच्चवषट्कारस्तस्यचादौप्लु
तिस्ततोनुमंत्रणंइत्येतद्याज्यास्वरूपनिदर्शनं।अनुमंत्रणस्ययाज्यांतभावेवचनंतदंतंवाग्यम

नार्थं। तनूनपादग्न आज्यस्य वेत्विति द्वितीयोऽन्यत्र वसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः। वसिष्ठादि
भ्योऽन्येषामयं द्वितीयः। नराशंसो अग्न आज्यस्य वेत्विति तेषां। वसिष्ठादीनामयं द्वितीयः। इळो अग्न
आज्यस्य व्यंत्विति तृतीयः। सर्वेषामिति शेषः। बर्हिरग्न आज्यस्य वेत्विति चतुर्थः। आग्नेर्यपंचमे स्वा
हामुं स्वाहामुमिति यथावाहितमनुद्रुत्य देवता यथाचोदितमनावाहिता स्वाहा देवा आज्य॰। जुषाणा
अग्न आज्यस्य व्यंत्विति। पंचमे एवंरूपत्वात्तेनैव यजेदिति शेषः। आग्नेयो विधानं क्रमार्थं। प्रतिदैवतं
स्वाहाशब्दाभ्यां सार्थद्वीप्सावचनं। यथावाहितग्रहणं प्रमादादावाहिताया अस्थानित्या अपि ग्रहणा
र्थं। यथाचोदितमित्यनेन स्थानित्यो पि यादेवता प्रमादादनावाहितास्तु स्तासामप्यत्र यथाचोदितेक्र
मे निगमनार्थं। प्रयाजानुयाजानीत्यादिषु यथाचोदितं तदीयानां देवतानां निगमनार्थं च। इदमेव प्रकारद्व १५
यमनावाहितग्रहणाद् ह्यते। नान्यथा। यथावाहितग्रहणेन पठितावाहनावृगत्यं तेनासांपाठादेव निगमनं
नान्यथेत्यर्थः। स्वाहा देवा इति यथासूत्रं मंत्रशेषः॥ आतो मंद्रेण॥ इतः पूर्वं यत्तन्मंद्रेण प्रयोक्तव्यं। अत्र
पूर्वावधेरभावादन्यत्रैतत्पूर्वमग्निमंथनादिषु भवति तदपि मंद्रेण प्रयोक्तव्यमिति गम्यते। त्रीणि वास्व

स्थानानि मंद्रमध्यमोत्तमसंज्ञकानि। तेषु च सप्त सप्त यमा भवंति। यमा नामावस्था। तत्र सप्तमयमे
न वषट्कारः प्रयोक्तव्यः ततएकावरोहेण याज्या। एवं सर्वत्र। एकैकयमावरोहेण वषट्कारः प्रयोक्त
व्यः॥ ऊर्ध्वं शंयुवाकात्॥ मंद्रेण प्रयोक्तव्यं। मध्यमेन हवींष्यास्विष्टकृतः॥ सर्वत्राकारोऽभिविधावे
वात्र त्वभिविधौ मर्यादायां वा भवत्यध्वर्युवशात्। अतः स्विष्टकृत्। मध्यमेनोत्तमेन वा अध्वर्युवशात्प्रयो
क्तव्यः। प्रयाजेभ्य ऊर्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः। हविर्ग्रहणं स्थानांतरेपि प्रधानहविषां मध्यम
स्वर एवेति॥ उत्तमेन शेषः॥ इळादिस्विष्टकृदादिर्वा शंयुवाकांतः शेष इत्युच्यते। स उत्तमेन प्रयोज्यः
। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या। त्वं सोमासि सत्पतिरित्युत्तरस्य। जुषाणो
अग्निराज्यस्य वेत्विति पूर्वस्य याज्या। जुषाणः सोम आज्यस्य हविषो वेत्वित्युत्तरस्य। तावाग्नेय्यादेशं
यजति॥ तावित्याज्यभागसंप्रत्ययार्थं। आग्नेयेति देवतादेशस्य क्रमविधानार्थं। यजतीति देवतादेश
स्य याज्यायां संधाय यजतीत्यर्थः॥ सर्वाश्चानुवाक्यावत्यो प्रैषा अन्या अन्वायास्ताभ्यः। या अन्वायात
शब्देनानुनिर्वापशब्देन वा चोदिताः ता अन्वायास्त्याः ताभ्योऽन्या यादेवता अनुवाक्यावत्यो प्रैषाश्च ताः
सर्वा आदिश्य यष्टव्याः अन्वायास्तानामनुवाक्यारहितानां च संप्रैषाणामादेशो न कर्तव्य इत्यर्थः

१६ सर्वेग्रहणमान्यभागयो रपि संप्रैषयो रादेशानिवृत्त्यर्थं ॥ सौमिकीन्यग्रश्च्या अंतरेण वैश्वानरीयं पत्नीसं
याजांश्च ॥ सौमिकश्चः सोमे उत्पन्नाः न सोमे प्रयोज्या अपि तु तस्मिन्नानाग्नेयमेव तत्र भवत्वसंभवात वैश्वा
नरीयपत्नीसंयाजानां तच्छब्दे चोदितानामेव ग्रहणमुक्तं । अत एव तस्मिन्नेवासने वैश्वानरीयस्य यजन
नीये तदेव ग्रहणे पत्नीसंयाजेष्वरित्वावभ्यर्थं वर्जनीति एतदेव चा । अन्या इत्यनुवर्तते अंगप्र
धानरूपे सोमकर्माणि यो नो वैश्वानरीयपत्नीसंयाजनशब्दचोदितौ पदार्थनियोगध्येयास्तत्रैवोत्पन्नादे
वतास्ताभ्योऽप्यन्यादेवता आदिश्य वषट्कार्यान्वता आदिश्य वषट्कार्या इत्यर्थः ॥ एतौ वार्त्रघ्नौ पौर्णमास्यां ॥ या
वैतौ पौर्णमास्यामाज्यभागौ तौ वार्त्रघ्नसंज्ञौ भवत इत्यर्थः । सन्निमित्तेयं संस्थेत्याह ॥ अनुवाक्यालिंग
विशेषान्नामधेयान्यत्वं ॥ तेनो विचारः ॥ अनुवाक्यात एव विचारावगमोऽन्यत्वमित्यर्थः ॥ नित्येया
ज्ये ॥ उक्ते एव मे सर्वत्र याज्ये नानुवाक्या वेदे तयोरन्यत्वमित्यर्थः ॥ वृधन्वंतावमावास्यायां ॥ अग्निः १६
प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयमिति ॥ आतो वाग्यमनं ॥ आदितः आरभ्याज्यभागपर्यंतं वाग्यमनं
भवति ॥ अंतरा च याज्यानुवाक्ये ॥ निगदानुवचनाभिष्टवनशब्दपानां चारभ्यासमाप्तेः । अत्रा
भिष्टवनसंस्तवनशास्त्रेति संस्तवनशब्दः पठितव्यः । आरभ्येति वचनमन्यदपि यत्याज्यादिभ्य

स्तदारभ्यासमाप्तेर्वाग्यमनमस्ति ध्यर्थं । होतुरधिकारात्कर्मांतरस्यापि प्रापणार्थं चेति ॥ अन्यद्यज्ञस्य साध
नात् ॥ यद्यज्ञसाधनवचसोऽन्यत्र वाग्यमनं नियम्यते । यज्ञसाधनवचनो नाम यद्यज्ञसंपादनार्थं तद्व्येष परिहा
रार्थं च ॥ आपद्यातो देवा अवंतु न इति जपेत ॥ आपद्येति नियममतिक्रम्येत्यर्थः ॥ अपि वान्यां वैष्णवीं ॥ अ
न्यामपीति वचनं सर्वो त्वायया अपि वैष्णवीत्वप्रतिपत्त्यर्थं ॥ ५ ॥ उक्ता देवतास्तासां याज्यानुवाक्या अग्निर्मू
र्धा भुवो यज्ञस्यायमग्निः सहस्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवी मेष एतामग्नीषोमा सवेदसा युव
मेतानि दिवि रोचनानी इन्द्राग्नी अवसागतं गीर्भिर्विप्रः प्रमतिमिच्छमानः ईडानः स्विरयिं प्रसस्ता हिषेपुरुरु
तशाक्रन्महाँ इन्द्रो य ओजसा भुवस्त्वमिंद्र ब्रह्मणा महानिति यथाग्नीषोमीय उपांशुयाजोऽग्नीषोमीयो अग्ने
वामान्यैन्द्रो वैमातरिश्वा अजभारेति । उक्तसंकीर्तनं देवताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्यमा
णालिंगक्रमाभ्यां योजनीया इति । इदमपि उक्तसंकीर्तनस्य प्रयोजनं । यत्र देवता विधायत इदं स्म चोवि
धीयंते तत्र तासां देवतानां ता एव याज्यानुवाक्या इति सार्वत्रिकोऽयं विधिरित्येतत् ज्ञापयितुं । अयमग्नि
रिति गायत्र्यापि याज्यानंतरमुक्तत्वाद्याज्ये भवति । सा तु गायत्री सामान्यादप्रधान एव भवति । यद्यग्नी
षोमीय इति ब्रुक्र्म्यां ते पठन्न् असंशयार्थमुक्तत्वान्नाचार्यः ॥ अथ स्विष्टकृतः पिप्री हि देवां उशतो यवि

श्रौ·सू·
१८

छेत्यनुवाक्या। अथशब्दः प्रधानानंतरं स्विष्टकृतो यागः स्यान्नावाहनक्रमेणेति। अनुवाक्यावचनं
सर्वत्र पूर्वमनुवाक्या पश्चाद्याज्येति प्रदर्शनार्थं। ये३ यजामहेऽग्निं स्विष्टकृतमयाळग्निरित्युक्त्वा षष्ठ्यावि
भक्त्या देवतामादिश्य प्रियाधामान्ययाळित्युपसंतनुयात्। आग्नेर्विधानं निगदादेव स्यान्न स्वगादाविति
अग्निं स्विष्टकृतमिति वचनं अग्निंहोत्रा यशब्देनादेशो न स्यादिति। षष्ठीविधानं द्वितीयायम्निर्दिष्टस्यर्थं
देवतामादिश्य प्रियाधामानीति शब्दमुपसंतनुयात्। अयाट्शब्दः पूर्वपठित एवोत्तरेस्वत्रेऽग्नेः तस्यास्त प
स्यादेवतायाः पुरस्तादतिदेशरूपेण विधीयते। देवताया उपरिष्टाद्विधीयमानेन प्रियाधामानि शब्देन संधा
नार्थं प्रियाधामान्ययाळिति संततं पठितं। अतोऽत्र प्रतिदेवतमेक एवायाट्शब्दः प्रयोक्तव्यो न द्वितीय इति सिद्ध
तं॥ एवमुत्तरा अयाळयाळिति त्वेवतासां पुरस्तात्। उत्तरासामयं विशेषः। अयाट्शब्द एव तासां पुरस्ता
तु पुरस्तात् प्रयोज्यो नाग्निशब्दोऽपीति। एतदुक्तं भवति। प्रथमदेवतायाः पुरस्तादयाळग्निशब्द उत्तरासा १८
मयाट्शब्द एवं सर्वासामुपरिष्टात्प्रियाधामानि शब्दः सर्वत्र संततावक्तव्या इति। आज्यपांतमनुक्रम्य
देवानामाज्यपानां प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणो
तु सो अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्य होतरित्यनवानं यजतीति। आज्यपांतमिति

प्रसिद्धक्रमसंग्रहादावाहनक्रमोऽत्रापि परिगृह्यते तेनास्थानिन्यानिगमनमिहापि स्यात्। आज्यपांतमे
वमुक्त्वा तदनंतरेण प्रियाधामानि शब्देन यक्षदिति संधाय यथासूत्रमुक्त्वा जुषतां हविरग्ने यदद्येत्यृचा
नुच्छ्वसन्यजेत्। सर्वत्रानुच्छ्वासः कर्तव्योऽस्यां याज्यायां॥ प्रकृत्या वा॥ अर्धर्चे वोच्छ्वसेत्॥ ६॥ प्रदेशिन्याः
पर्वण्युत्तमेऽञ्जयित्वौष्ठयोरभ्यात्मं निमार्ष्टि। प्रदेशिनी नामांगुलिविशेषः। पर्वसंधिः उत्तमे इत्यग्रतो
द्वे पर्वणी इत्यर्थः। अध्वर्युणा ते पर्वणी अञ्जयित्वा अभ्यात्मं पाणितलं कृत्वा। औष्ठयोरवगिपर्वगं निमार्ष्टि
वाचस्पतिना ते हुतस्येषे प्राणाय प्राश्नामीत्युत्तरमुत्तरेण मनसस्पतिना ते हुतस्योर्जेऽपानाय प्राश्नामीत्यधरमध
रे। अनेनैव क्रमेणानयोरर्थः। स्पृष्ट्वोदकमंजलिनैकां प्रतिगृह्य सव्ये पाणौ कृत्वा पश्चाद्दस्याउदगंगुलिं
पाणिमुपधायावांतरेडामवदापयीत। द्विहस्तसंयोगोंऽजलिः। तं कृत्वा तेनेडां गृहीत्वा सव्ये पाणौ कृत्वा निधा
येत्यर्थः। अस्या इडाया इत्यर्थः। यातस्त्वेवदीयते सा अवांतरेडा अवदापयीताध्वर्युं। अंतरेणांगुष्ठ
मंगुलीश्चास्त्वयं द्वितीयमाददीत। अंगुल्यंगुष्ठयोर्मध्येन प्रदेशेन स्वयमिडाया अवांतरेडामाददीत
प्रत्यालब्धामंगुष्ठेनाभिसंगृह्य प्रत्याहृत्य। प्रत्यालब्धां स्पृष्टामध्वर्युणेत्यर्थः। अंगुलीरमुष्टिं कृत्वा
दक्षिणत इडां परिगृह्यास्य संमितामुपह्वयते प्राणसंमितां वा। अमुष्टिं कृत्वा अंगुलिभ्यो बहिरंगुष्ठमह

त्वेत्यर्थः। सव्ये हस्ते निहितामिडां दक्षिणेन हस्तेन गृहीत्वा वांतरेडां दक्षिणतः परिगृह्यास्य संमितां
प्राणसंमितां वेडां कृत्वा तामुपह्वयते प्राणसंमितां नासिकासंमितामित्यर्थः॥ इडोपहूता सह दिवा बृ
हतादित्येनोपास्मां इडा ह्वयतां सह दिवा बृहतादित्येनेडोपहूता सहांतरिक्षेण वामदेव्येन वायुनोपा
स्मां इडा ह्वयतां सहांतरिक्षेण वामदेव्येन वायुनेडोपहूता सह पृथिव्या रथंतरेणाग्निनोपास्मां इडा
ह्वयतां सह पृथिव्या रथंतरेणाग्निनोपहूता गावः सहाशिर उपमां गावः सहाशिरा ह्वयंतामुपहूता धेनुः
सहऋषभोपमां धेनुः सहऋषभा ह्वयतामुपहूता गौर्घृतपद्युपमां गौर्घृतपदी ह्वयतामुपहूता दिव्याः स
प्तहोतार उपमां दिव्याः सप्तहोतारो ह्वयंतामुपहूतः सखा भक्ष उपमां सखा भक्षो ह्वयतामुपहूतेडा
वृष्टिरूपमामिडा वृष्टिर्ह्वयतामित्युपांश्वथोच्चैः। इडोपहूतोपहूतेडोपास्मां इडा ह्वयतामिडोपहूता॥
मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहूता मनुष्याः। य इमं यज्ञम
वान्ये च यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे। उपहूतोयं यजमान उत्तरस्यां १८
देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूत इति॥ इडोपहूता स
ह दिवेत्यादिना तस्मिन्नुपहूत इत्यंतेन उपह्वयत इत्युपांश्वित्यनेन निगदानां तंत्रस्वरत्वादप्राप्तमुपांशु

त्वं विधीयते। नैनेडा श्रुत्यमनुपरतमेवेति स्थितं। अथोच्चैरित्यनेनोत्तरस्य निगदभागस्य तंत्रस्वरानपगमः
कथ्यते। प्राप्तत्वान्नापूर्वं विधीयते। तस्मिन्ननुच्यमाने संशयः स्यान्निगदमध्ये उपांशुत्वमुच्यमानं किं स
र्वस्य निगदस्य। आहोस्वित्पूर्वस्य भागस्यापरस्य वेति। अस्मिंस्तूच्यमाने पूर्वस्यैव भागस्योपांशुत्वं वि
हितं भवति नोत्तरस्य भवतीति नात्र संशयः। पुरा मानवी शब्दात्। उपहूता मनुष्याः देवी देवपुत्रे इति त्री
ण्यवसानानि॥ उपहूय वांतरेडां प्राश्नीयादिडे भागं जुषस्व नः जिन्व गा जिन्वार्वतो रायस्पोषस्येशिषे तस्य
नो रास्व तस्य नो दास्व तस्यास्ते भागमशीमहि सर्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषा इ
ति वा। उपहूयेत्यनुच्यमाने हविर्जुषंतामिति निगदांतः स्यात्। तस्मिन्नुपहूत इत्यवांतरेडाभक्षणमंत्रः।
स्यादिडे भागमिति वानयोर्विकल्पार्थो वाशब्दः सर्वपूरुषाः सर्वपुरुषा इति पदद्वयविशिष्टश्च मंत्र इ
त्येते दोषाः स्युः एतस्मिंस्तूच्यमाने तस्मिन्नुपहूत इत्येव मंत्रो निगदः स्यात् पुरुषा इति शब्दांतो निगदे
कदेशः स्यात् वाशब्दश्च मंत्रावयवविकल्पार्थ एव स्यात्। सर्वपुरुषा इत्येत इति शब्दात् नैतावान्म
त्रो वानेव च मंत्रः स्यात् इत्येवं सर्वं समंजसं भवति॥ होता वांतरेडां भक्षयित्वेडामपि भक्षयेत्। सर्वे च सय
जमाना इडां भक्षयेयुः इडा सर्वेषामिति पशुविभागे दर्शनात्। शास्त्रांतरे च यजमानपंचमा इडां भ

श्रौ.सू.
१९ क्षयेयुरिति दर्शनाच्च ॥ ७ ॥ मार्जयित्वानुयाजैश्चरंति। मार्जनमिज्याभक्षणांगं। पित्र्यायामिज्याभ
क्षणाभावेमार्जनस्याप्यभावदर्शनात्। भक्षयित्वामार्जनेदृष्टश्चोपकारोस्तिशुद्धिर्नामातइज्यांत
कर्मस्वपिमार्जनमस्त्येव। नैतदनुयाजांगंचतुर्धाकरणदक्षिणादानाभ्यांव्यवहितत्वात्। पित्र्यायाम
नुयाजसत्तायामपितदभावदर्शनाच्च। अतोमार्जयित्वानुयाजैश्चरंतीतिवचनंचतुर्धाकरणदक्षिणा
दानयोरनित्यत्वस्यख्यापनार्थं। तथाह्यनाग्नेयेषुचतुर्धाकरणंनास्ति अंगभक्तेषुदक्षिणादानंनास्ती
ति। परिस्तरणेरंजलिमंतर्धायापआसेचयतेतन्मार्जनं। आहवनीयस्यपरिस्तरणेः। भक्षणार्थंनि
क्रम्यपुनःप्रविष्टानांप्रथमप्राप्तत्वात्तेषामासेचयतेऽपः सहकारिणा॥ देवादयोनुयाजाः॥ देवादयो
देवशब्दादयइत्यर्थः पुनरनुयाजग्रहणंउत्तरस्यसूत्रस्यप्रयाजानुयाजार्थत्वाय॥ वीतवत्यंताः॥
वीतवत्यंतत्वंप्रयाजानुयाजयोर्गुणस्यात्॥ त्रयः॥ तेऽनुयाजास्त्रयोभवंति। एकैकंप्रेषितोयजति १९
देवान्यजेतिप्रथमसंप्रैषस्यसर्वार्थत्वेसत्यपिपुनःप्रेषितएवयजेत्। इमेनुयाजाः॥ देवंबर्हिर्वसुव
नेवसुधेयस्यवेतुदेवोनराशंसोवसुवनेवसुधेयस्यवेतुदेवो अग्निःस्विष्टकृत्सुद्रविणामंद्रः क
विःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयान्देवानयाड्यांअपिप्रैर्येतेहोत्रेअमत्सततांस

सनुषीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमंस्विष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्यनमोवाकेवी
हीति। अनवानंवा। अमत्सतेत्यत्रावसायवा। अनवसायवायजेत॥ ८ ॥ सूक्तवाकायसंप्रेषितइ
दंद्यावापृथिवीभद्रमभूदार्ध्मसूक्तवाकमुतनमोवाकमृध्यास्मसूक्तोच्यमग्नेत्वंसूक्तवागसि। उप
श्रुतीदिवस्पृथिव्योरोमन्वतीतेऽस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां। शंगयीजीरदानूअत्रस्नूअ
प्रवेदेउरुगव्यूतीअभयंकृतौ। वृष्टिद्यावारीत्यापाशंभुवौमयोभुवाऊर्जस्वतीपयस्वतीसूपचरणाद
स्वधिचरणावेत्योराविदीत्यवसायप्रथमयाविभक्त्यादिश्यदेवतामिदंहविरजुषतावीवृधतम
होज्यायोऽकृतेत्युपसंतनुयात्॥ आसि॥ स्तां। अभयंकृतौ। विदि। कृतेतिवा अक्रातामक्रतेत्येवंयज
मानस्यनामनी। मानुषाः। इत्यवसानानिसर्वाणिनिगदे। अत्रनुप्रथमाविधानंद्वितीयानिर्दिष्टेत्यर्थः।
आविदीत्यत्रावसाप्रथमयाविभक्त्यादिश्यदेवतामिदंहविरित्युपसंतनुयात्॥ एवमुत्तराः॥ उत्तरा
मपिदेवताआदिश्यइदंहविरित्येवमुपसंतनुयात्॥ अक्रातामक्रतेतियथार्थं। द्विदेवत्यंबहुदेवत
योरेवमूहः कर्तव्यः। यथार्थवचनं अर्थवशेनाभिधानमित्येवमर्थः॥ उक्तमुपांशोः॥ आवहस्वाहे
त्युक्तमित्यर्थः। उक्तेवचनमस्यनिगदस्यपशावपीष्टिवदेवप्रयोगार्थंनसूक्तवाकप्रैषवदजुषतादी
आज्यपा नामुपांशुत्वंभवति॥ आवापिकांतमनुद्रुत्यदेवाआज्यमजुषतावीवृधंतमहोज्यायोऽक्रताग्निर्हो

श्रौ॰ सू॰
२०

त्रेणेदं हविरजुषतावीवृधत महो ज्यायोऽकृतास्यामृधेद्धोत्रायां देवंगमायामाशास्तेऽयं यजमानोऽसा
वसावित्यस्या दिश्य नामनी उपांशु संनिधौ गुरोरायुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशा
स्ते सजातवनस्यामाशास्त उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते वि
श्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासन्तां तदग्निर्देवो देवेभ्यो वनते
वयमग्नेर्मानुषाः। इष्टं च वीतं चाभूदुभे च नो द्यावापृथिवी अंहसस्पातामेह गतिर्वामस्येदं नमो देवेभ्य इति
।आवापिकान्तमित्यादि इदं नमो देवेभ्य इत्यन्तं। आवापिकान्तमित्येतदावापिकदेवताक्रमप्राप्त्यर्थं तेना
स्थानिन्यत्रापि निगद्यते। देवा आज्यपा इति यथा सूत्रं। असावसावित्यत्र यजमाननामनी प्रथमया वि
भक्त्या निर्दिशेत्। सा व्यवहारिकं नाक्षत्रं वा। होतुर्गुरुश्चेद्यजमानस्यात्तत्संनिधौ उपांशु नामनी ब्रूया
त्॥ ॥ शंयुवाकाय संप्रेषितस्तच्छंयोरावृणीमह इत्याहानुवाक्यावदप्रणवां। अनुवाक्यावद्वच
नमेकश्रुत्यप्रापणार्थं। अप्रणवामिति प्रणवो निषिध्यते॥ वेदमस्मै प्रयच्छत्यध्वर्युः। वेदग्रहणकाल २०
ज्ञापनार्थं एतत्सूत्रं। अतोऽध्वर्युणा दत्ते गृह्णीयात्। अदत्तेऽपि स्वयमेव गृह्णीयात्। तं गृह्णीयात्
वेदोऽसि वेदो विदे येत्येति। तमिति वीप्सार्थं। यदा द्वौ दद्यात्तदा तं गृह्णीयात् इत्यर्थः। यदि द्वौ युग

पद्यान्तर्हृदेन मन्त्रं ब्रूयात्। वरुणप्रघासादिषु। उदायुषेत्येतेनोपोत्थाय पश्चाद्गार्हपत्यस्योपविश्य
सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमित्याज्येन यजन्ति। एतेनेति वचनं प्रकृतिविकारभावेऽपि कृत्स्न
स्यमन्त्रस्य प्रापणार्थं। आज्यवचनं यत्रान्येन सोमद्रव्येन तत्र ते याज्यानुवाक्ये भवतः। नान्यहविष्के सोम इ
ति। यजन्तीति वचनं याग एव तासां देवतानां न निगमेष्वनुवृत्तिरिति॥ आप्यायस्व समेतु ते सं ते पयांसि समु
यन्तु वाजा इह त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु देवानां पत्नीरुशतीरवन्तु न इति द्वे अग्निर्होता
गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः। इदं संज्ञाविधानार्थं। अथ प्रजा
कामो राकां सिनीवालीं कुहूमिति प्राग्गृहपतेर्यजेत। अथशब्दः पक्षान्तरपरिग्रहार्थः। अथ वेद्यजमा
नः प्रजाकामस्यात्तदेवैता देवता यजेतेति। प्राग्गृहपतेरिति देशविधानेन पूर्वाभिः समुच्चयं दर्शयति।
राकामहं सिनीवालि कुहूमहमिति द्वे द्वे याज्यानुवाक्ये। याज्यानुवाक्यावचनं प्रजाकामो य नेतेत्यने
न यजमाने संनिहितेऽपि होतैव कर्ता स्यादिति। याज्यानुवाक्ययोर्होतृकर्तृत्वमन्यतः प्रसिद्धमिति। कु
हूमहमिति प्रतीके गृहीतेऽपि स्वयमेव पठति। कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवी

श्रौ
श्रौ. सू.

२१ मि। सानो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य ह
विषः शृणोतु। संदाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधात्विति। आज्यं पाणितलेऽवदापयीते
ऽथामुपहूय सर्वं प्राश्नीयात्। पर्वाजिनाद्युपहूनानां तत्कार्यं नात्रावांतरेडापाणितलस्थमाज्यमिडेत्युच्य
ते। ततः सर्वं प्राश्नीयादित्युच्यते। शंयुवाको भवेन्न वा। आज्येडायाऊर्ध्वं शंयुवाको भवति। न भवतीत्ये
ऽध्वर्युणां संस्थाप्रकारः संतीति तत्सूचनार्थमेतत्सूत्रं। यदि स्याद्धोतापि तथा कुर्यादित्येवमर्थं॥ १०॥
वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा। वेदोसि वित्तिरसि विदेय कर्मासि करणमसि क्रियासं सनिरसि स
नितासि सनेयं घृतवंतं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं यं बहव उपजीवंति यो जनानां
मसदृश्ी। तं विदेय प्रजां विदेय कामाय त्वेति। पत्न्यै वेदं प्रदाय तां वाचयति होताध्वर्युर्वा। वेदोसीत्यादिका
माय त्वेत्येवमंतं मंत्रं। वाचनं मंत्रस्योच्चैः प्रयोगार्थात्सिध्यति। कार्यं तु लिंगं गौवर्जितमेव। वेदं शिरसा नाभि २१
देशमालभेत प्रजाकामा चेत्। यदि पत्नी प्रजाकामा स्यादिति कामयेत तदा वेदस्याग्रेणानुसदृशेन प्रदेशेन प
त्नी स्वनाभिमालभेत। कामाभावेपि वाचनं भवत्येव॥ अथास्यायोक्त्रं विचृतेत्यत्रामुं वामिवरुण